# Devi Namavali from Shankaracharya's Saundaryalahari

# सौन्दर्यलहर्यधिष्ठिता देवीनामावलिः

## Document Information

Text title : Shri Devi Namavali constructed from Shankaracharya Saundaryalahari

File name : saundaryalaharyadhiShThitAdevInAmAvaliH.itx

Category : devii, nAmAvalI, laharI, shankarAchArya, devI, dashamahAvidyA

Location : doc_devii

Author : Constructed by Narendran Madathil madathilnarendran at gmail.com

Transliterated by : Narendran Madathil madathilnarendran at gmail.com

Proofread by : Narendran Madathil

Latest update : May 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2024

*sanskritdocuments.org*

Devi Namavali from Shankaracharya's Saundaryalahari

# सौन्दर्यलहर्यधिष्ठिता देवीनामावलिः

(अवलम्बः - श्री आदिशङ्कराचार्यविरचितं सौन्दर्यलहरीस्तोत्रम्)
अम्मे नारायण देवि नारायण लक्ष्मिनारायण भद्रे नारायण ।
ॐ
हरिः श्रीगणपतये नमः ।
श्रीमहासरस्वत्यै नमः ।
ॐ श्रीगुरुभ्यो नमः ।
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ।
श्रीहेमाम्बिकायै नमः ।
नमश्शिवायै च नमश्शिवाय ।
ॐ सर्वचैतन्यरूपां तां आद्यां विद्यां च धीमहि बुद्धिं या नः प्रचोदयात् ।

क्रमसङ्ख्या. नामानि । (श्लोकः)
१. शिवयुक्तायै शक्त्यै नमः । (१)
२. यस्याः वियोगे शिवः स्पन्दितुमपि शक्तो न भवति तस्यै शक्त्यै नमः । (१)
३. हरिहरविरिञ्चादिभिरप्याराध्यायै महादेव्यै नमः । (१)
४. यां प्रणन्तुं स्तोतुं च अकृतपुण्यः न प्रभवति तस्यै महादेव्यै नमः । (१)
५. यस्याः चरणपङ्केरुहभवं तनीयांसं पांसुं सञ्चिन्वन् विरिञ्चिः लोकान् विरचयति तस्यै शक्त्यै नमः । (२)
६. यस्याः अनुग्रहेण शौरिः सहस्रेण शिरसा कथमपि लोकान् अविकलं वहति तस्यै शक्त्यै नमः । (२)
७. यस्याः चरणपांसुं सङ्क्षुद्य हरः भस्मोद्धूलनविधिं भजति तस्यै शक्त्यै नमः । (२)
८. अविद्यानां अन्तस्तिमिरमिहिरद्वीपनगर्यै महादेव्यै नमः । (३)
९. जडानां चैतन्यस्तबकमकरन्दस्रुतिझर्यै महादेव्यै नमः । (३)
१०. दरिद्राणां चिन्तामणिगुणनिकायै महादेव्यै नमः । (३)
११. जन्मजलधौ निमग्नानां मुररिपुवराहस्य दंष्ट्रायै महादेव्यै नमः । (३)

१२. भयात्त्रातुं वाञ्छासमधिकं फलमपि दातुञ्च प्रकटित वराभीत्यभिनयाभ्यां देव्याः निपुणचरणाभ्यां नमः । (४)
१३. लोकानां शरण्यायै महादेव्यै नमः । (४)
१४. प्रणतजनसौभाग्यजनन्यै महादेव्यै नमः । (५)
१५. यां आराध्य हरिः पुरा नारीभूत्वा पुररिपुमपि क्षोभमनयत् तस्यै महादेव्यै नमः । (५)
१६. यां नत्वा स्मरोऽपि रतिनयनलेह्येन वपुषा महतां मुनीनामपि मोहाय अन्तः प्रभवति तस्यै महादेव्यै नमः । (५)
१७. यस्याः कामपि कृपां अपाङ्गात् लब्ध्वा अनङ्गो जगदिदं विजयते तस्यै महादेव्यै नमः । (६)
१८. क्वणत्काञ्चीदामायै करिकळभकुम्भस्तननतायै महादेव्यै नमः । (७)
१९. मध्ये परिक्षीणायै परिणतशरच्चन्द्रवदनायै महादेव्यै नमः । (७)
२०. करतलैर्धनुर्बाणान् पाशं सृणीमपि दधानायै महादेव्यै नमः । (७)
२१. पुरमथितुराहोपुरुषिकायै महादेव्यै नमः । (७)
२२. सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयायै चिदानन्दलहर्यै महादेव्यै नमः । (८)
२३. या मूलाधारे महीं, मणिपूरे कं, स्वाधिष्ठाने स्थितं हुतवहं, हृदि मरुतं, उपरि आकाशं, भ्रूमध्ये मनोऽपि सकलं कुळपथं भित्वा सहस्रारे पद्मे रहसि पत्या सह विहरति तस्यै महादेव्यै नमः । (९)
२४. चरणयुगळान्तर्विगळितैः सुधाधारासारैः प्रपञ्चं सिञ्चन्त्यै महादेव्यै नमः । (१०)
२५. रसाम्नायमहसः स्वां भूमिं अवाप्य स्वमात्मानं भुजगनिभं अध्युष्टवलयं कृत्वा कुळकुण्डे कुहरिणि स्वपन्त्यै महादेव्यै नमः । (१०)
२६. यस्याः शरणकोणाः चतुर्भिश्श्रीकण्ठैः, शम्भोः प्रभिन्ना पञ्चभिः शिवयुवतिभिः इति नवभिः मूलप्रकृतिभिरपि, वसुदळकलाश्रत्रिवलयत्रिरेखाभिः सार्द्धं परिणताःचतुश्चत्वारिंशत् भवन्ति तस्यै महादेव्यै नमः । (११)
२७. यस्याः सौन्दर्यं तुलयितुं विरिञ्चिप्रभृतयः कवीन्द्राऽपि न शक्नुवन्ति तस्यै तुहिनगिरिकन्यायै महादेव्यै नमः । (१२)
२८. यस्याः आलोकौत्सुक्यादमरललना तपोभिः दुष्प्रापां गिरिशसायूज्यपदवीमपि मनसा यान्ति तस्यै महादेव्यै नमः । (१२)
२९. यस्याः अपाङ्गालोके पतितं वर्षीयांसं नयनविरसं नर्मसु जडं नरं शतशः गळद्वेणीबन्धाः कुचकलशविस्रस्तसिचयाः हठात् त्रुट्यत्काञ्च्यः विगळितदुकूलाः शतशः युवतयः अनुधावन्ति तस्यै महादेव्यै नमः । (१३)

३०. यस्याः पादाम्बुजयुगं क्षितौ षट्पञ्चाशत्, उदके द्विसमधिकपञ्चाशत्, हुताशे द्वाषष्टिः, अनिले चतुरधिकपञ्चाशत्, दिवि द्विःषट्त्रिंशत्, मनसि चतुःषष्टि च मयुखानामुपरि वर्तते तस्यै महादेव्यै नमः । (१४)

३१. शरज्ज्योत्स्नाशुभ्रायै शशियुतजटामकुटायै वरत्रासत्राणस्फटिकघुटिकापुस्तककरायै महादेव्यै नमः । (१५)

३२. यां सकृन्नत्वा सतां मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः सन्निदधते तस्यै महादेव्यै नमः । (१५)

३३. यां कतिचित् सन्तः कवीन्द्राणां चेतःकमलबालातपरुचिं अरुणां एव भजन्ते तस्यै महादेव्यै नमः । (१६)

३४. सतां रञ्जनं विदधुं तरुणतरशृङ्गारलहरीगभीरवाक्प्रदायिन्यै विरिञ्चिप्रेयस्यै महादेव्यै नमः । (१६)

३५. वाचां सवित्रीभिः शशिमणिशिलाभङ्गरुचिभिः वशिन्यादिभिः सह जनन्यै महादेव्यै नमः । (१७)

३६. महतां भङ्गिरुचिभिः वाग्देवीवदनकमलामोदमधुरैः वचोभिः काव्यानां कर्तृत्वपटुत्वदायिन्यै महादेव्यै नमः । (१७)

३७. यस्याः तरुणतरणिश्रीसरणिभिः तनुच्छायाभिः सर्वा दिवं उर्वीं च अरुणिमनिमग्नां रूपध्यानेन उर्वश्या सह त्रस्यद्वनहरिणशालीननयनाः गीर्वाणगणिकाः वश्या भवन्ति तस्यै महादेव्यै नमः । (१८)

३८. मुखं बिन्दुं कृत्वा तस्य अधः कुचयुगं तदधः हरार्द्धं इति यस्याः मन्मथकलाध्यानेन वनिताः अतिलघु सङ्क्षोभं नयति पुनः ध्याननिष्ठया रवीन्दुस्तनयुगां त्रिलोकीमप्याशु भ्रमयति तस्यै महादेव्यै नमः । (१९)

३९. अङ्गेभ्यः किरणनिकुरुम्बामृतरसं किरन्तीं हिमकरशिलामूर्त्तिमिव यां ध्यात्वा सर्पाणां दर्पशमकः शकुन्ताधिपः इव, सुधाधारसिरया दृष्ट्या, ज्वरशमनप्राप्तिं लभते तस्यै महादेव्यै नमः । (२०)

४०. तटिल्लेखातन्वीं तपनशशिवैश्वानरमयीं षण्णां कमलानामप्युपरि महापद्माटव्यां निषण्णां देवीकलां मृदितमलमायेन मनसा पश्यतां महतां परमाह्ळादलहरीप्रदायिन्यै महादेव्यै नमः । (२१)

४१. भवानि त्वं दासे मयि सकरुणां दृष्टिं वितर इति स्तोतुं वाञ्छन् “भवानि त्वं” इति कथनादेव मुकुन्दब्रह्मेन्द्रस्फुटमकुटनीराजितपदनिजसायुज्यपदवीदायिन्यै महादेव्यै नमः । (२२)

४२. वामं वपुः हृत्वा, अपरितृप्तेन मनसा, शम्भोरपरमपि देव्या हृतमभूत् इति शङ्काकारिण्यै महादेव्यै नमः । (२३)

४३. सकलमरुणाभारूपायै त्रिणयनायै कुचाभ्यामानम्रायै कुटिलशशिमकुटायै महादेव्यै नमः । (२३)
४४. यस्याः क्षणचलितयोः भ्रूलतिकयोः आज्ञामालम्ब्य धाता जगत्सूते, हरिरवति, रुद्रः क्षपयते एतत् सर्वं तिरस्कुर्वन् स्वं वपुरपि ईशः तिरयति, सदापूर्वः शिवः तत् इदं सर्वं अनुगृह्णाति च तस्यै महादेव्यै नमः । (२४)
४५. यस्याः चरणयोः या पूजाः विरचिता सा त्रिगुणजनितानां त्रयाणां देवानां अपि पूजा भवति तस्यै महादेव्यै नमः । (२५)
४६. यस्याः पादोद्वहनमणिपीठस्य निकटे त्रयो देवाऽपि मुकुळितकरोत्तंसमकुटाः शश्वत् स्थिताः दृश्यते तस्यै महादेव्यै नमः । (२५)
४७. विरिञ्चिः पञ्चत्वं व्रजति, हरिर्विरतिमाप्नोति, कीनाशो विनाशं भजति, धनदः नाशं याति, माहेन्द्री विततिरपि सम्मीलितदृशा वितन्द्री भवति, तदापि अस्मिन् महासंहारे यस्याः पतिरेव विहरति तस्यै सत्यै महादेव्यै नमः । (२६)
४८. आत्मार्पणदृशा मया कृत जल्पः जपः, सकलं शिल्पमपि मुद्राविरचना, गतिः प्रादक्षिण्यक्रमणं, अशनादि आहुतिविधिः, संवेशः प्रणामः अखिलं सुखं यत् मे विलसितं देवीसपर्यापर्यायो भवतु इति मया प्रार्थ्यमानायै महादेव्यै नमः । (२७)
४९. विश्वे विधिशतमखाद्या दिविषदः प्रतिभयजरामृत्युहरिणीं सुधां आस्वाद्यापि विपद्यन्ते, तथापि यस्याः ताटङ्कमहिमया कराळं क्ष्वेळं कबळितवतः शम्भोः कालकलनं नास्ति तस्यै जनन्यै महादेव्यै नमः । (२८)
५०. भवस्य भवनं उपयातस्य यस्याः प्रसभं अभ्युत्थाने, ब्रह्मविष्ण्वेन्द्रेषु प्रणम्रेषु "पुरो वैरिञ्चं किरीटं परिहर, कैटभभिदः कठोरे कोटीरे स्खलसि, जम्भारिमकुटं परिहर" इति परिजनोक्तिः श्रूयते तस्यै महादेव्यै नमः । (२९)
५१. स्वदेहोत्भूताभिः घृणिभिः अणिमाद्याभिः अभितः देवीं अहमिति सदा भावयति यः, यस्याः कृपया, तस्य त्रिणयनसमृद्धिं तृणयतः, महासंवर्ताग्निः नीराजनविधिं विरजयति, तस्यै नित्यायै निषेव्यायै महादेव्यै नमः । (३०)
५२. पशुपतिः तत्तत्सिद्धिप्रसवपरतन्त्रैः चतुःषष्ट्या तन्त्रैः सकलं भुवनं अतिसन्धाय स्थितः पुनः यस्याः निर्बन्धात् अखिलपुरुषार्थैकघटनास्वतन्त्रं इदं देव्याः तन्त्रं क्षितितलं अवातीतरत् तस्यै महादेव्यै नमः । (३१)
५३. शिवः, शक्तिः, कामः, क्षितिः, रविः, शीतकिरणः, स्मरः, हंसः, शक्रः, तदनु परा, मारः, हरिः इति अमी वर्णाः तिसृभिः हृल्लेखाभिः अवसानेषु घटिताः वर्णाः यस्याः नामावयवतां भजन्ते तस्यै जनन्यै महादेव्यै नमः । (३२)
५४. निरवधिमहाभोगरसिकाः आदौ स्मरं योनिं लक्ष्मीं इदं त्रितयं मनोः निधाय चिन्तामणिगुणनिबद्धाक्षवलयाः शिवाग्नौ सुरभिघृतधाराहुतिशतैः जुह्वन्तः यां भजन्ति तस्यै

नित्यायै महादेव्यै नमः । (३३)
५५. शम्भोः शशिमिहिरवक्षोरुहयुगशरीरायै भगवत्यै महादेव्यै नमः । (३४)
५६. यस्याः आत्मानं अनघं नवात्मानं मन्यते तस्यै महादेव्यै नमः । (३४)
५७. याभ्यां शेषश्शेषीसम्बन्धः उभयसाधारणतया स्थितः ताभ्यां समरसपरानन्दपरयोः महादेवीदेवाभ्यां नमः । (३४)
५८. मनोव्योममरुद्मरुत्सारथिः आपोभूमिः इत्येवं परिणतायै यस्याः परं नास्ति तस्यै महादेव्यै नमः । (३५)
५९. या विश्ववपुषा परिणमयितुं शिवयुवतिभावेन स्वात्मानं चिदानन्दाकारं बिभृषे तस्यै महादेव्यै नमः । (३५)
६०. आज्ञाचक्रस्थस्य तपनकोटिद्युतिशशिधरस्य परचिता परिमिळितपार्श्वस्थस्य वन्द्यस्य शम्भोः पत्न्यै महादेव्यै नमः । (३६)
६१. यं भक्त्या आराध्यन् रविशशिशुचीनां अविषये निरालोके अलोके भालोकभुवने निवासः साध्यो भवति तस्य परमेश्वरस्य पत्न्यै महादेव्यै नमः । (३६)
६२. विशुद्धौ शुद्धस्फटिकविशदाय व्योमजनकाय शिवाय महादेवाय शिवसमानव्यवसितायै महादेव्यै च नमः । (३७)
६३. ययोः यान्त्याः शशिकिरणसारूप्यसरणेः कान्त्या विधूतान्तर्ध्वान्ता जगती चकोरी इव विलसति ताभ्यां महादेवीमहादेवाभ्यां नमः । (३७)
६४. समुन्मीलत्संवित्कमलमकरन्दरसिकाभ्यां महतां मानसचराभ्यां किमपि हंसद्वन्द्वाय महादेवीमहादेवाभ्यां नमः । (३८)
६५. याभ्यां आलापात् अष्टादशगुणितविद्यापरिणतिः अभवत्, यो हंसद्वन्द्वं दोषात् अखिलं गुणं अद्भ्यः पयः इव आदत्ते ताभ्यां महादेवीमहादेवाभ्यां नमः । (३८)
६६. स्वाधिष्ठाने हुतवहं संवर्त्तं निरतं अधिष्ठाय अनवरतं स्तूयमानाय महादेवाय महतीं समयायै महादेव्यै च नमः । (३९)
६७. महति क्रोधकलिते रुद्रालोके लोकान् दहति सति या दयार्द्रा दृष्ट्या शिशिरं उपचारं रचयति तस्यै महादेव्यै नमः । (३९)
६८. तिमिरपरिपन्थिस्फुरणया शक्त्या तटित्वन्तं स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषे श्यामाय हरमिहिरतप्तं त्रिभुवनं वर्षते कमपि मेघरूपाय महादेव्याः मणिपूरैकशरणाय महादेवाय नमः । (४०)
६९. मूले आधारे लास्यपरया समयया सह नवमहारसताण्डवनटाय नवात्मने महादेवाय महादेव्यै च नमः । (४१)
७०. उदयविधिं उद्दिश्य दयया सनाथाभ्यां एताभ्यां उभाभ्यां इदं जगत् जनकजननीमत् ज्ञायते ताभ्यां महादेवीमहादेवाभ्यां नमः । (४१)

७१. नीडे यच्छायाच्छुरणशबळं धनुःशौनासीरं इति दृश्यमानं चन्द्रशकलं माणिक्यत्वं गतैः गगनमणिभिः सान्द्रघटितहैमकिरीटं च धृतवत्यै हिमगिरिसुतायै महादेव्यै नमः । (४२)
७२. यस्याः दलितेन्दीवरवनतुलितस्य घनस्निग्धश्लक्ष्णचिकुरनिकुरुम्बस्य सहजं सौरभ्यं उपलब्धुं वलमथनवाटीविटपिनां सुमनसः यस्मिन् केशभारे वसन्ति तस्यै ध्वान्तनाशिन्यै शिवायै महादेव्यै नमः । (४३)
७३. यस्याः वदनसौन्दर्यलहरीपरीवाहः स्रोतस्सरणीसमानसीमन्तसरणिः प्रबलकबरीभारतिमिरद्विषां वृन्दैः बन्दीकृत नवीनार्ककिरणं इव दृश्यते तस्यै क्षेमकारिण्यै महादेव्यै नमः । (४४)
७४. यस्याः दशनकिञ्जल्करुचिरे, पङ्केरुहरुचिं परिहसति दरस्मेरे, अराळैस्स्वाभाव्यात् अळिकळभसश्रीभिः अळकैः परीतं सुगन्धौ वक्रे स्मरदहनचक्षुर्म्मधुलिहः माद्यन्ति तस्यै महादेव्यै नमः । (४५)
७५. यस्याः ललाटं लावण्यद्युतिविमलं मकुटघटितं द्वितीयं चन्द्रशकलं इव आभाति, तयोः विपर्यासन्यासात् उभयमपि मिथः सम्भूय सुधालेपस्यूतिः राकाहिमकरः इव परिणमति तस्यै महादेव्यै नमः । (४६)
७६. यस्याः किञ्चित् भुग्ने भ्रुवौ मधुकररुचिभ्यां नेत्राभ्यां धृतगुणं सव्येतरकरगृहीतं प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरं रतिपतेः धनुषिव दृश्यते तस्यै भुवनभयभङ्गव्यसनिन्यै उमायै महादेव्यै नमः । (४७)
७७. यस्याः सव्यं नयनं अर्कात्मकतया अहस्सूते, वामं रजनीनायकतया त्रियामां सृजति, तृतीया दृष्टिः दिवनिशयोरन्तरचरीं दरदलितहेमाम्बुजरुचिः सन्ध्यां समाधत्ते तस्यै महादेव्यै नमः । (४८)
७८. यस्याः दृष्टिः विशाला कल्याणी स्फुटरुचिः कुवलयैः अयोध्या कृपाधाराधारा किमपि मधुरा आभोगवतिका अवन्ती इति बहुनगरविस्तारविजया तत्तन्नामव्यवहरणयोग्या विजयते तस्यै महादेव्यै नमः । (४९)
७९. कवीनां सन्दर्भस्तबकमकरन्दैकरसिकं कर्णयुगळं कटाक्षव्याक्षेपभ्रमरकळभौ नवरसास्वादतरळौ अमुञ्चन्तौ दृष्ट्वा यस्याः अळिकनयनं असूयासंसर्गात् किञ्चिदरुणं दृश्यते तस्यै महादेव्यै नमः । (५०)
८०. यस्याः दृष्टिः शिवे शृङ्गारार्द्रा, तदितरजने कुत्सनपरा, गङ्गायां सरोषा, गिरिशचरिते विस्मयवती, हराहिभ्यो भीता, सरसिरुहसौभाग्यजननी, सखीषु स्मेरा, भक्तेषु सकरुणा विद्यते तस्यै जनन्यै महादेव्यै नमः । (५१)
८१. यस्याः नेत्रे कर्णाभ्यर्णं गते, गरुत इव पक्ष्माणि दधती, पुरां भेत्तुः चित्तप्रशमरसविद्रावणफले आकर्णाकृष्टस्मरशरविलासं कलयते तस्यै गोत्राधरपतिकुलोत्तंसकलिकायै महादेव्यै नमः । (५२)
८२. यस्याःनेत्रत्रितयं उपरतान् द्रुहिणहरिरुद्रान् देवान् पुनःस्रष्टुं रजस्सत्वं तमः इति त्रयं गुणानां बिभ्रत् इव विभक्तत्रैवर्ण्यं व्यतिकरितलीलाञ्जनतया विभाति तस्यै ईशानदयितायै महादेव्यै नमः । (५३)

८३. या जनान् पवित्रीकर्त्तुं दयामित्रैः अरुणधवळश्यामरुचिभिः नेत्रैः शोणः, गङ्गा, तपनतनया इति त्रयाणां अनघं सम्भेदं उपनयति ध्रुवं तस्यै पशुपतिपराधीनायै महादेव्यै नमः । (५४)
८४. यस्याः उन्मेषनिमेषाभ्यां जगती प्रळयमुदयं याति तथा यस्याः उन्मेषात् जातं जगदिदं प्रळयतः परित्रातुं यस्याः दृशः परिहृतनिमेषाः तस्यै धरणिधरराजन्यतनयायै महादेव्यै नमः । (५५)
८५. यस्याः कर्णजपनयनपैशुन्यचकिताः शफरिकाः अनिमेषाः नियतं तोये निलीयन्ते तथा श्रीः बद्धच्छदपुटकवाटं कुवलयं प्रत्यूषे जहाति निशि विघटय्य प्रविशति च तस्यै अपर्णायै महादेव्यै नमः । (५६)
८६. या वने वा हर्म्ये वा समकरनिपातः हिमकरसदृशा द्राघीयस्या दरदलितनीलोत्पलरुचा दृशा दवीयांसं दीनं भक्तं कृपया दृशा स्नापयित्वा विना हानिं धन्यो भावयति तस्यै शिवायै महादेव्यै नमः । (५७)
८७. यस्याः अराळं पालीयुगळं कुसुमशरकोदण्डकुतुकं आधत्ते यत्र तिरश्चीनो विलसन् अपाङ्गव्यासङ्गः श्रवणपथमुल्लङ्घ्य शरसन्धानधिषणां दिशति तस्यै अगराजन्यतनयायै महादेव्यै नमः । (५८)
८८. यस्याः स्फुरद्गण्डाभोगप्रतिफलितताटङ्कयुगळं मुखं, चतुश्चक्रं मन्मथरथं मन्यते, महावीरो मारः यं आरुह्य अर्केन्दुचरणं अवनिरथं सज्जितवते प्रमथपतये द्रुह्यति तस्यै महादेव्यै नमः । (५९)
८९. यस्याः अमृतलहरीकौशलहरीः सूक्तिः श्रवणचुलुकाभ्यां अविरळं पिबन्त्याः चमत्कारश्लाघाचलितशिरसः सरस्वत्याः कुण्डलगणः तारैः झणत्कारैः प्रतिवचनं आचष्ट इव श्रूयते तस्यै शर्वाण्यै महादेव्यै नमः । (६०)
९०. यस्याः नासावंशः जनानां उचितं नेदीयः फलं फलति, अन्तः मुक्ताः वहति, यत् तासां समृद्ध्या शिशिरकरनिश्वासगळितं बहिः अपि मुक्तामणिधरोऽस्ति तस्यै तुहिनगिरिवंशध्वजपट्यै महादेव्यै नमः । (६१)
९१. यस्याः प्रकृत्या आरक्तायाः दन्तच्छदरुचेः विद्रुमलताफलसदृशा बिम्बप्रतिफलनरागात् अरुणितं बिम्बं तुलां अध्यारोढुं विलज्जते तस्यै सुदत्यै महादेव्यै नमः । (६२)
९२. यस्याः वदनचन्द्रस्य स्मितज्योत्स्नाजालं पिबतां चकोराणां अतिरसतया चञ्चुजडिमा आसीत्, अतस्ते आम्ळरुचयः निशि निशि शीतांशोः अमृतलहरीं काञ्चिकधिया स्वच्छन्दं भृशं पिबन्ति तस्यै महादेव्यै नमः । (६३)
९३. यस्याः जिह्वा पत्युर्गुणगणकथाम्रेडनजपा जपापुष्पच्छाया विद्यते, यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी सरस्वत्याः मूर्त्तिः माणिक्यवपुषा परिणमति च तस्यै जनन्यै महादेव्यै नमः । (६४)

९४. रणे दैत्यान् जित्वा निवृत्तैः, अपहृतशिरस्त्रैः कवचिभिः चण्डांशत्रिपुरहरनिर्माल्यविमुखैः, विशाखेन्द्रोपेन्द्रैः यस्याः शशिविशदकर्पूरशकलाः वदनताम्बूलकबळाः विलीयन्ते तस्यै मात्रे महादेव्यै नमः । (६५)
९५. पशुपतेः विविधमपदानं गायन्ती वाणी ययारब्धे साधुवचने तदीयैर्माधुर्यैः अपलपिततन्त्रीकळरवां निजां वीणां चोळेन निभृतं निचुळयति तस्यै महादेव्यै नमः । (६६)
९६. तुहिनगिरिणा वत्सलतया स्पृष्टं, गिरिशेन अधरपानाकुलतया मुहुरुदस्तं, शम्भोः करग्राह्यं, मुखमुकुरवृन्तं यस्याः औपम्यरहितं चुबुकं अवर्णनीयं विद्यते तस्यै गिरिसुतायै महादेव्यै नमः । (६७)
९७. यस्याः ग्रीवा नित्यं पुरदमयितुः भुजाश्लेषात् कण्टकवती मुखकमलनाळश्रियं धत्ते, अधः स्वभावेन स्वतः श्वेता यत् कालागरुबहुलजम्बालमलिना हारलतिका मृणाळीलाळित्यं वहति तस्यै महादेव्यै नमः । (६८)
९८. यस्याः विवाहव्यानद्धप्रगुणगुणसङ्ख्याप्रतिभुवः गळे तिस्रः रेखाः नानाविधमधुररागाकरभुवां त्रयाणां ग्रामानां स्थितिनियमसीमानः इव विराजन्ते तस्यै गतिगमकगीतैकनिपुणायै महादेव्यै नमः । (६९)
९९. सरसिजभवः प्रमथमथनात् अन्धकरिपोः नखेभ्यः सन्त्रस्यन् चतुर्ण्णां शीर्षाणां समं अभयहस्तार्प्पणधिया चतुर्भिः वदनैः यस्याः मृणाळीमृद्वीनां चतसृणां भुजलतानां सौन्दर्यं स्तौति तस्यै महादेव्यै नमः । (७०)
१००. यस्याः नखानां उद्योतैः नवनळिनरागं विहसतां कराणां कान्तिः अवर्ण्णनीयमस्ति यस्याः साम्यं कमलं क्रीडल्लक्ष्मीचरणतललाक्षारसचणं यदि भवेत् तदा कयाचिद्वा कलया भजेत् तस्यै उमादेव्यै महादेव्यै नमः । (७१)
१०१. यस्याः समं स्कन्दद्विपवदनपीतं सततं प्रस्नुतमुखं स्तनयुगं आलोक्य हेरम्बः आशङ्काकुलितहृदयः हासजनकः हस्तेन स्वकुम्भौ झटिति परिमृशति तस्यै भक्तखेदहारिण्यै महादेव्यै नमः । (७२)
१०२. यस्याः अमृतरसमाणिक्यकुतुपौ वक्षोजौ पिबन्तौ द्विरदवदनक्रौञ्चदलनौ कुमारौ अद्यापि अविदितवधूसङ्गरसिकौ भवतः तस्यै नगपतिपताकायै महादेव्यै नमः । (७३)
१०३. यस्याः कुचाभोगः स्तम्बेरमदनुजकुम्भप्रकृतिभिः मुक्तामणिभिः समारब्धां बिम्बाधररुचिभिः अन्तःशबळितां अमलां हारलतिकां पुरदमयितुः प्रतापव्यामिश्रां कीर्तिं इव वहति तस्यै अम्बायै महादेव्यै नमः । (७४)
१०४. यस्याः स्तन्यं हृदयतः पयःपारावारः सारस्वतमिव परिवहति यया दयावत्या दत्तं स्तन्यं आस्वाद्य द्रविडशिशुः प्रौढानां कवीनां कमनीयः कवयिता अजनि तस्यै धरणिधरकन्यायै महादेव्यै नमः । (७५)

१०५. मनसिजः हरक्रोधज्वालावलिभिः अवलीढेन वपुषा यस्याः नाभीसरसि कृतसङ्गः तस्मात् समुत्तस्थौ धूमलतिका जनः यस्याः रोमावलिः इति जानीते तस्यै अचलतनयायै महादेव्यै नमः । (७६)

१०६. यस्याः कृशे मध्ये कालिन्दीतनुतरतरङ्गाकृति भान्तं यद्वस्तु कुचकलशयोः अन्योन्यं विमर्द्दात् अन्तरगतं कुहरिणीं नाभिं प्रविशत् व्योम इव सुधियां भाति तस्यै जनन्यै शिवायै महादेव्यै नमः । (७७)

१०७. यस्याः नाभिः स्थिरः गङ्गावर्त्तः, स्तनमुकुळरोमावलिलताकलावालं, कुसुमशरतेजोहुतभुजः कुण्डं, रतेः लीलागारं, गिरिशनयनानां सिद्धेः बिलद्वारं इति किमपि विजयते तस्यै गिरिसुतायै महादेव्यै नमः । (७८)

१०८. यस्याः निसर्गक्षीणस्य स्तनतटभरेण क्ळमजुषः नमन्मूर्त्तेः शनकैः त्रुट्यत इव त्रुटिततटिनीतीरतरुणा समावस्थास्थेम्नः मध्यः चिरं कुशलो भवतु इति कविना प्रार्थितः तस्यै नारीतिलकायै शैलतनयायै महादेव्यै नमः । (७९)

१०९. यस्याः देव्याः सद्यः स्विद्यत्तटघटितकूर्प्पासभिदुरौ दोर्म्मूले कषन्तौ कनककलशाभौ कुचौ कलयता तनुभुवा भङ्गात् त्रातुं अलं इति वलग्नं त्रिवलि लवलीवल्लिभिः त्रिधा नद्धं प्रतीयते तस्यै महादेव्यै नमः । (८०)

११०. क्षितिधरपतिः निजात् नितम्बात् गुरुत्वं विस्तारं हरणरूपेण निदधे, अतः यस्याः नितम्बप्राग्भारः गुरुः विस्तीर्णः सन् अशेषां वसुमतीं स्थगयति, लघुत्वं प्रापयति तस्यै पार्वत्यै महादेव्यै नमः । (८१)

१११. यस्याः ऊरुयुग्मेन करीन्द्राणां कनककदलीकाण्डपटलीं इति उभयं, पत्युः प्रणतिकठिनाभ्यां सुवृत्ताभ्यां जानुभ्यां विबुधकरिकुम्भद्वयं अपि निर्जित्य भवति तस्यै विधिज्ञायै गिरिसुतायै महादेव्यै नमः । (८२)

११२. विषमविशिखः रुद्रं पराजेतुं यस्याः जङ्घे द्विगुणशरगर्भौ निषङ्गौ अकृत, यदग्रे सुरमकुटशाणैकनिशिताः पादयुगळीनखाग्रच्छद्मानः दशशरफलाः दृश्यन्ते तस्यै गिरिसुतायै महादेव्यै नमः । (८३)

११३. यस्याः चरणयुगळं श्रुतीनां मूर्द्धानः शेखरतया दधति, यस्याः पाद्यं पाथः पशुपतिजटाजूटतटिनी, यस्याः लाक्षालक्ष्मीः अरुणहरिचूडामणिरुचिः, तस्यै मात्रे महादेव्यै नमः । (८४)

११४. यस्याः स्फुटरुचिरसालक्तकवतः पदद्वन्द्वं नयनरमणीयं भवति, पशूनां ईशानः यदभिहननाय स्पृहयते, प्रमदवनकङ्केळितरवे अत्यन्तं असूयति तस्यै महादेव्यै नमः । (८५)

११५. मृषा गोत्रस्खलनं कृत्वा अथ वैलक्ष्यनमितं भर्तारं यस्याः चरणकमले ललाटे ताडयति सति, चिरात् दहनकृतं अन्तश्शल्यं उन्मूलितवता ईशानरिपुणा तुलाकोटिक्वाणैः किलिकिलिता तस्यै महादेव्यै नमः । (८६)

११६. हिमगिरिनिवासैकचतुरं निशि चरमभागे च विशदौ समयिनां श्रियं अतिसृजन्तं यस्याः पादयुगळं हिमानीहन्तव्यं निशायां निद्राणां वरं लक्ष्मीपात्रं सरोजं जयतः तस्यै महादेव्यै नमः । (८७)

११७. यस्याः कीर्तीनां पदं विपदां अपदं सद्भिः कठिनकमठीकर्परतुलां नीतं प्रपदं पुरभिदा दयमानेन मनसा बाहुभ्यां आदाय दृषदि न्यस्तं तस्यै महादेव्यै नमः । (८८)

११८. यस्याः चरणयुग्मं दरिद्रेभ्यः भद्रां श्रियं अनिशं अह्नाय ददतं, नाकस्त्रीणां करकमलसङ्कोचशशिभिः नखैः किसलयकराग्रेण स्वःस्थेभ्यः फलानि ददतां दिव्यानां तरूणां हसतः इव दृश्यते तस्यै चण्ड्यै महादेव्यै नमः । (८९)

११९. दीनेभ्यः आशानुसदृशीं श्रियं अनिशं ददाने सौन्दर्यप्रकरमकरन्दं अमन्दं विकिरति, मन्दारस्तबकसुभगे यस्याः चरणे करचरणः निमज्जन् भक्तस्य जीवः षड्चरणतां प्राप्नोति तस्यै महादेव्यै नमः । (९०)

१२०. स्खलन्तः भवनकळहंसाः पदन्यासक्रीडापरिचयं आरब्धुमनसः इव यस्याः खेलं न जहति, अतः यस्याः चरणकमलं सुभगमणिमञ्जीररणितच्छलात् तेषां शिक्षां आचक्षाणं इव विलसति तस्यै चारुचरितायै महादेव्यै नमः । (९१)

१२१. द्रुहिणहरिरुद्रेश्वरभृतः यस्याः मञ्चत्वं गता, शिवः स्वच्छच्छायाघटितकपटप्रच्छदपटः यस्याः भासां शरीरी शृङ्गाररसः इव दृशां कुतुकं दोग्धि तस्यै महादेव्यै नमः । (९२)

१२२. या केशेषु अराळा, मन्दहसिते प्रकृतिसरळा, चित्ते शिरीषाभा, कुचतटे दृषदुपलशोभा, मध्ये भृशं तन्वी, उरसिजारोहविषये पृथुः, जगत् त्रातुं शम्भोः काचित् करुणा इति जयति तस्यै अरुणायै महादेव्यै नमः । (९३)

१२३. कलङ्कं कस्तूरी, रजनिकरबिम्बं कलाभिः कर्पूरैः निबिडितं मरकतकरण्डं, अतः यस्याः भोगेन प्रतिदिनं रिक्तकुहरं इदं विधिः भूयः भूयः यस्याः कृते नूनं निबिडयति तस्यै महादेव्यै नमः । (९४)

१२४. या पुरारातेः अन्तपुरं, ततः यस्याः चरणयुगळे सपर्यामर्यादा तरळकरणानां असुलभा, तथा हि शतमखमुखाः अमराः यस्याः द्वारोपान्तस्थितिभिः अणिमाद्याभिः अतुलां सिद्धिं नीताः तस्यै महादेव्यै नमः । (९५)

१२५. कति कति कवयः वैधात्रं कळत्रं न भजन्ते? कैः धनैः अपि कः वा श्रियः देव्याः पतिः न भवति? यस्याः कुचाभ्यां आसङ्गः महादेवं हित्वा कुरवकतरोरपि असुलभः तस्यै सतीनामचरमायै सत्यै महादेव्यै नमः । (९६)

१२६. यां आगमविदः द्रुहिणगृहिणीं गिरां देवीं, हरेः पत्नीं पद्मां, हरसहचरां अद्रितनयां आहुः, या तुरीया दुरधिगमनिस्सीममहिमा कापि महामाया असि, या विश्वं भ्रमयसि तस्यै परब्रह्ममहिष्यै महादेव्यै नमः । (९७)

१२७. यस्याः कलितालक्तकरसं चरणनिर्णेजनजलं प्रकृत्या मूकानामपि कविताकारणतया वाणीमुखकमलताम्बूलरसतां धत्ते तस्यै मात्रे महादेव्यै नमः । (९८)
१२८. यस्याः भजनवान् सरस्वत्या, लक्ष्म्या, विधिहरिसपत्नः विहरते, रम्येण वपुषा रतेः पातिव्रत्यं शिथिलयति, क्षपितपशुपाशव्यतिकरः चिरं जीवन्नेव परानन्दाभिख्यं रसं रसयति तस्यै महादेव्यै नमः । (९९)
१२९. यथा स्वकीयाभिः प्रदीपज्वालाभिः दिवसकरनीराजनविधिः, यथा स्वकीयै चन्द्रोपलजललवैः सुधासूतेः अर्घ्यरचना, यथा स्वकीयै अम्भोभिः सलिलनिधिसौहित्यकरणं तथा देवीप्रसादेन लब्धवाग्भिः शङ्करभगवत्पादाचार्येण महास्तोत्रं कृत्वा स्तुतायै महादेव्यै नमः । (१००)
१३०. तथा गुरुप्रसादेन लब्धवाग्भिः स्तुत्वा इयं नामावलिः महादेवीचरणयुगळे अनन्यभक्त्या समर्पयामि ।

ॐ तत् सत् ।
शुभमस्तु ।
ॐ श्री महादेव्यै नमः ।
सर्वं खल्विदमेवाहं नान्यदस्ति सनातनं इति देवीवचनम् ।
अज्ञानात् विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतं तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ।
श्री हेमाम्बिकायै नमः ।
देवीकृपया नामसमाहरणं - मठत्तिल् नरेन्द्रन्
कृतज्ञता - श्री मोहन् चेट्टूर्

Compiler's Contact Details: Madathil Narendran, Nama Sivaya, Kallekulangara, Palakkad-678009, Kerala, India.
E-mail: madathilnarendran at gmail dot com Ph. (91) 94950-35516
Any shortcomings or errors noted may please be communicated to compiler for review and correction.

*Devi Namavali from Shankaracharya's Saundaryalahari*
pdf was typeset on May 11, 2024

Please send corrections to *sanskrit@cheerful.com*